मिव गृह्णातु कृत्या कृत्याकृतं पुनः । अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम् । सुखो रथ इव वर्त्ततां कृत्या कृत्याकृतं पुनः" ।

सुश्रुते चान्यप्रकारोऽत्र सामान्यतो दर्शितः यथा "कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च । रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् । नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः । अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा । पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः । दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः । पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा । पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः । अग्नीरक्षतु ते जिह्वां प्राणान् वायुस्तथैव च । सोमो व्यान, मपानं ते पर्जन्यः परिरक्षतु । उदानं विद्युतः पान्तु, समानं स्तनयित्नवः । बलमिन्द्रो बलपति, र्मनुर्मन्ये मतिं तथा । कामांस्ते पान्तु गन्धर्व्वाः, सत्वमिन्द्रोऽभिरक्षतु । प्रज्ञां ते वरुणो राजा, समुद्रो नाभिमण्डलम् । चक्षुः सूर्य्यो, दिशः श्रोत्रे, चन्द्रमाः पातु ते मनः । नक्षत्राणि सदा रूपं, छायां पान्तु निशास्तव । रेतस्त्वाप्याययन्त्वापो, रोमाण्योषधयस्तथा । आकाशं खानि ते पातु, देहं तव वसुन्धरा । वैश्वानरः शिरः पातु, विष्णुस्तव पराक्रमम् । पौरुषं पुरुषश्रेष्ठो, ब्रह्मात्मानं, ध्रुवो भ्रुवौ । एता देहे विशेषेण तव नित्या हि देवताः । एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि । स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्वताम् । स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्वतौ । स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः । पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव । ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः । इति स्वाहा । एतैर्वेदात्मकैर्म्मन्त्रैः कृत्याव्याधिविनाशनैः । मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि" ।

"ततोऽसुरा एषु लोकेषु कृत्यां वलगान्निचखनुरुतैवं चिद्देवानभिभवेमेति, "तद्वै देवा अस्पृण्वत । तएतैः कृत्यां वलगानुदखनन्,यदा वै कृत्यामुत्खनन्ति" "अत्र कश्चिद्द्विषन् भ्रातृव्यः कृत्यां वलगान्निखनति" इति च शत०ब्रा० ३,५,४,२,२, "यामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति न संशयः" मनुः

**कृत्याकृत्य** न० द्वि० । द्वन्द्व० १कर्त्तव्याकर्त्तव्ययोः । सुश्रुतोक्ते २व्रणचिकित्साङ्गे कर्त्तव्याकर्त्तव्यविशेषे च, ते च कृत्याकृत्ये सुश्रुतेन दर्शिते यथा,

"अथातः कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः । तत्र वयस्थानां दृढानां प्राणवतां सत्ववताञ्च सुचिकित्स्या व्रणा एकस्मिन् वा पुरुषे यत्रैतद्गुणचतुष्टयं तस्य सुखसाधनीयतमाः । तत्र वयस्थानां प्रत्यग्रधातुत्वादाशु व्रणारोहन्ति । दृढानां स्थिरबहुमांसत्वाच्छस्त्रमवचार्य्यमाणं सिरास्नाय्वादिविशेषान्न प्राप्नोति । प्राणवतां वेदनाभिघाताहारयन्त्रणादिभिर्न ग्लानिरुत्पद्यते । सत्ववतां दारुणैरपि क्रियाविशेषैर्न व्यथा भवति । तस्मादेतेषां सुखसाधनीयतमाः । तएव विपरीतगुणा वृद्धकृशाल्पप्राणभीरुषु द्रष्टव्याः । स्फिक्पायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोषोदरजत्रुमुखाभ्यन्तरसंस्थाः सुखरोपणीया व्रणाः । अक्षिदन्तनासापाङ्गश्रोत्रनाभिजठरसेवनीनितम्बपार्श्वकुक्षिवक्षःकक्षास्तनसन्धिभागगताः सफेनपूयरक्तानिलवाहिनोऽन्तःशल्याश्च दुश्चिकित्स्याः । अधोभागाश्चोर्द्ध्वभागनिर्वाहिनो रोमान्तोपनखमर्म्मजङ्घास्थिसंश्रिताश्च । भगन्दरमपि चान्तर्मुखं सेवनीकुटकास्थिसंश्रितम् ।

भवति चात्र । कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् । व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः । अवपाटिकानिरुद्धप्रकाशसन्निरुद्धगुदजठरग्रन्थिक्षतक्रिमयः प्रतिश्यायजाः कोष्ठजाश्च त्वग्दोषिणां प्रमेहिणां वा ये परिक्षतेषु दृश्यन्ते शर्करासिकतामेहवातकुण्डलिकाष्ठीलादन्तशर्करोपकुशकण्ठशालूकनिष्कोषणदूषिताश्च दन्तवेष्टाविसर्पास्थिक्षतोरःक्षतव्रणग्रन्थिप्रभृतयश्च याप्याः । साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा । घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् । यापनीयं विजानीयात् क्रिया धारयते तु यम् । क्रियायान्तु निवृत्तायां सद्य एव विनश्यति । प्राप्ता क्रिया धारयति याप्यव्याधितमातुरम् । प्रपतिष्यदिवागारं विष्कम्भः साधुयोजितः । अतऊर्द्ध्वमसाध्यान् वक्ष्यामः । मांसपिण्डवदुद्गताः प्रक्लेदिनोऽन्तःपूयवेदनावन्तोऽश्वापानवदुद्वृत्तौष्ठाः । केचित्कठिना गोशृङ्गवदुन्नतक्षुद्रमांसप्ररोहाः । अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिलास्राविणो वा मध्योन्नताः । केचिदवसन्नशुषिरपर्य्यन्ताः । शणतूलवत्स्नायुजालवन्तो दुर्दर्शा वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोषसमुत्थाः । पीताऽसितमूत्रपुरीषवातवाहिनश्च कोष्ठस्थाः क्षीणमांसानाञ्च सर्वतोगतयश्चाणुमुखा मांसबुद्बुदवन्तः सशब्दवातवाहिनश्च शिरःकण्ठस्थाः । क्षीणमांसानाञ्च पूयरक्तातिवाहिणोऽरोचकाविपाकका-